સ્વપિત્રોપામન્ત્રિતો ભગવતિ વાસુદેવ એવાવ્યવધાન-
સમાધિયોગેન સમાવેશિતસકલકારકક્રિયાકલાપો
નૈવાભ્યનન્દદ્યદ્યપિ તદપ્રત્યામ્નાતવ્યં તદધિકરણ
આત્મનોઽન્યસ્માદસતોઽપિ પરાભવમન્વીક્ષમાણઃ ॥ ૬॥

અથ હ ભગવાનાદિદેવ એતસ્ય ગુણવિસર્ગસ્ય
પરિબૃંહણાનુધ્યાનવ્યવસિતસકલજગદભિપ્રાય
આત્મયોનિરખિલનિગમનિજગણપરિવેષ્ટિતઃ
સ્વભવનાદવતતાર ॥ ૭॥

સ તત્ર તત્ર ગગનતલ ઉડુપતિરિવ વિમાનાવલિભિ-
રનુપથમમરપરિવૃઢૈરભિપૂજ્યમાનઃ પથિ પથિ ચ
વરૂથશઃ સિદ્ધગન્ધર્વસાધ્યચારણમુનિગણૈરુપગીયમાનો
ગન્ધમાદનદ્રોણીમવભાસયન્નુપસસર્પ ॥ ૮॥

તત્ર હ વા એનં દેવર્ષિર્હંસયાનેન પિતરં ભગવન્તં
હિરણ્યગર્ભમુપલભમાનઃ સહસૈવોત્થાયાર્હણેન સહ
પિતાપુત્રાભ્યામવહિતાઞ્જલિરુપતસ્થે ॥ ૯॥

ભગવાનપિ ભારત તદુપનીતાર્હણઃ સૂક્તવાકેનાતિતરા-
મુદિતગુણગણાવતારસુજયઃ પ્રિયવ્રતમાદિપુરુષસ્તં
સદયહાસાવલોક ઇતિ હોવાચ ॥ ૧૦॥

શ્રીભગવાનુવાચ
નિબોધ તાતેદમૃતં બ્રવીમિ
માસૂયિતું દેવમર્હસ્યપ્રમેયમ્ ।
વયં ભવસ્તે તત એષ મહર્ષિ-
ર્વહામ સર્વે વિવશા યસ્ય દિષ્ટમ્ ॥ ૧૧॥

ન તસ્ય કશ્ચિત્તપસા વિદ્યયા વા
ન યોગવીર્યેણ મનીષયા વા ।
નૈવાર્થધર્મૈઃ પરતઃ સ્વતો વા
કૃતં વિહન્તું તનુભૃદ્વિભૂયાત્ ॥ ૧૨॥

ભવાય નાશાય ચ કર્મ કર્તું
શોકાય મોહાય સદા ભયાય ।
સુખાય દુઃખાય ચ દેહયોગ-

શ્રીશુક ઉવાચ
ઇતિ લલનાનુનયાતિવિશારદો ગ્રામ્યવૈદગ્ધ્યયા
પરિભાષયા તાં વિબુધવધૂં વિબુધમતિરધિસભા-
જયામાસ ॥ ૧૭॥

સા ચ તતસ્તસ્ય વીરયૂથપતેર્બુદ્ધિશીલરૂપવયઃ-
શ્રિયૌદાર્યેણ પરાક્ષિપ્તમનાસ્તેન સહાયુતાયુત-
પરિવત્સરોપલક્ષણં કાલં જમ્બૂદ્વીપપતિના
ભૌમસ્વર્ગભોગાન્ બુભુજે ॥ ૧૮॥

તસ્યામુ હ વા આત્મજાન્ સ રાજવર આગ્નીધ્રો
નાભિકિમ્પુરુષહરિવર્ષેલાવૃતરમ્યકહિરણ્મયકુરુભદ્રાશ્વ-
કેતુમાલસંજ્ઞાન્ નવ પુત્રાનજનયત્ ॥ ૧૯॥

સા સૂત્વાથ સુતાન્ નવાનુવત્સરં ગૃહ એવાપહાય
પૂર્વચિત્તિર્ભૂય એવાજં દેવમુપતસ્થે ॥ ૨૦॥

આગ્નીધ્રસુતાસ્તે માતુરનુગ્રહાદૌત્પત્તિકેનૈવ
સંહનનબલોપેતાઃ પિત્રા વિભક્તા આત્મતુલ્યનામાનિ
યથાભાગં જમ્બૂદ્વીપવર્ષાણિ બુભુજુઃ ॥ ૨૧॥

આગ્નીધ્રો રાજાતૃપ્તઃ કામાનામપ્સરસમેવાનુદિન-
મધિમન્યમાનસ્તસ્યાઃ સલોકતાં શ્રુતિભિરવારુન્ધ
યત્ર પિતરો માદયન્તે ॥ ૨૨॥

સમ્પરેતે પિતરિ નવ ભ્રાતરો મેરુદુહિતૃર્મેરુદેવીં પ્રતિરૂપા-
મુગ્રદંષ્ટ્રીં લતાં રમ્યાં શ્યામાં નારીં ભદ્રાં દેવવીતિમિતિ સંજ્ઞા
નવોદવહન્ ॥ ૨૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
પઞ્ચમસ્કન્ધે આગ્નીધ્રવર્ણનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

# ॥ તૃતીયોऽધ્યાયઃ ॥

શ્રીશુક ઉવાચ
નાભિરપત્યકામોऽપ્રજયા મેરુદેવ્યા ભગવન્તં
યજ્ઞપુરુષમવહિતાત્માયજત ॥ ૧॥

તસ્ય હ વાવ શ્રદ્ધયા વિશુદ્ધભાવેન યજતઃ પ્રવર્ગ્યેષુ
પ્રચરત્સુ દ્રવ્યદેશકાલમન્ત્રર્ત્વિગ્દક્ષિણાવિધાનયોગો-
પપત્ત્યા દુરધિગમોऽપિ ભગવાન્ ભાગવતવાત્સલ્યતયા
સુપ્રતીક આત્માનમપરાજિતં નિજજનાભિપ્રેતાર્થ-
વિધિત્સયા ગૃહીતહૃદયો હૃદયઙ્ગમં મનોનયનાનન્દના-
વયવાભિરામમાવિશ્ચકાર ॥ ૨॥

અથ હ તમાવિષ્કૃતભુજયુગલદ્વયં હિરણ્મયં પુરુષવિશેષં
કપિશકૌશેયામ્બરધરમુરસિ વિલસચ્છ્રીવત્સલલામં
દરવરવનરુહવનમાલાચ્છૂર્યમૃતમણિગદાદિભિરુપલક્ષિતં
સ્ફુટકિરણપ્રવરમુકુટકુણ્ડલકટકકટિસૂત્રહારકેયૂર-
નૂપુરાદ્યઙ્ગભૂષણવિભૂષિતમૃત્વિક્સદસ્યગૃહપતયોऽધના
ઇવોત્તમધનમુપલભ્ય સબહુમાનમર્હણેનાવનતશીર્ષાણ
ઉપતસ્થુઃ ॥ ૩॥

ઋત્વિજ ઊચુઃ
અર્હસિ મુહુરર્હત્તમાર્હણમસ્માકમનુપથાનાં નમો નમ
ઇત્યેતાવત્સદુપશિક્ષિતં કોऽર્હતિ પુમાન્ પ્રકૃતિગુણ-
વ્યતિકરમતિરનીશ ઈશ્વરસ્ય પરસ્ય પ્રકૃતિપુરુષયો-
ર્વાક્તનાભિર્નામરૂપાકૃતિભી રૂપનિરૂપણમ્ ॥ ૪॥

સકલજનનિકાયવૃજિનનિરસનશિવતમપ્રવર-
ગુણગણૈકદેશકથનાદૃતે ॥ ૫॥

પરિજનાનુરાગવિરચિતશબલસંશબ્દસલિલસિત-
કિસલયતુલસિકાદૂર્વાઙ્કુરૈરપિ સમ્ભૃતયા સપર્યયા
કિલ પરમ પરિતુષ્યસિ ॥ ૬॥

અથાનયાપિ ન ભવત ઇજ્યયોરુભારભરયા સમુચિત-
મર્થમિહોપલભામહે ॥ ૭॥

આત્મન એવાનુસવનમઞ્જસાવ્યતિરેકેણ બોભૂયમા-
નાશેષપુરુષાર્થસ્વરૂપસ્ય કિન્તુ નાથાશિષ
આશાસાનાનામેતદભિસંરાધનમાત્રં ભવિતુમર્હતિ ॥ ૮॥

તદ્યથા બાલિશાનાં સ્વયમાત્મનઃ શ્રેયઃ પર-મવિદુષાં
પરમ પરમપુરુષ પ્રકર્ષકરુણયા સ્વમહિમાનં
ચાપવર્ગાખ્યમુપકલ્પયિષ્યન્ સ્વયં નાપચિત
એવેતરવદિહોપલક્ષિતઃ ॥ ૯॥

અથાયમેવ વરો હ્યર્હત્તમ યર્હિ બર્હિષિ રાજર્ષેર્વરદર્ષભો
ભવાન્ નિજપુરુષેક્ષણવિષય આસીત્ ॥ ૧૦॥

અસઙ્ગનિશિતજ્ઞાનાનલવિધૂતાશેષમલાનાં
ભવત્સ્વભાવાનામાત્મારામાણાં મુનીનામનવરત-
પરિગુણિતગુણગણપરમમઙ્ગલાયનગુણગણ
કથનોઽસિ ॥ ૧૧॥

અથ કથઞ્ચિત્સ્ખલનક્ષુત્પતનજૃમ્ભણદુરવસ્થાનાદિષુ
વિવશાનાં નઃ સ્મરણાય જ્વરમરણદશાયામપિ સકલ-
કશ્મલનિરસનાનિ તવ ગુણકૃતનામધેયાનિ
વચનગોચરાણિ ભવન્તુ ॥ ૧૨॥

કિઞ્ચાયં રાજર્ષિરપત્યકામઃ પ્રજાં ભવાદૃશીમાશાસાન
ઈશ્વરમાશિષાં સ્વર્ગાપવર્ગયોરપિ ભવન્તમુપધાવતિ
પ્રજાયામર્થપ્રત્યયો ધનદમિવાધનઃ ફલીકરણમ્ ॥ ૧૩॥

કો વા ઇહ તેઽપરાજિતોઽપરાજિતયા માયયા-
નવસિતપદવ્યાનાવૃતમતિર્વિષયવિષરયાનાવૃત-
પ્રકૃતિરનુપાસિતમહચ્ચરણઃ ॥ ૧૪॥

યદુ હ વાવ તવ પુનરદભ્રકર્તરિહ સમાહૂત-
સ્તત્રાર્થધિયાં મન્દાનાં નસ્તદ્યદ્દેવહેલનં દેવદેવાર્હસિ
સામ્યેન સર્વાન્ પ્રતિવોઢુમવિદુષામ્ ॥ ૧૫॥

શ્રીશુક ઉવાચ
ઇતિ નિગદેનાભિષ્ટૂયમાનો ભગવાનનિમિષર્ષભો
વર્ષધરાભિવાદિતાભિવન્દિતચરણઃ સદયમિદમાહ ॥ ૧૬॥

પઞ્ચમસ્કન્ધે ચતુર્થોઽધ્યાયઃ ॥ ૪॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ પઞ્ચમોઽધ્યાયઃ ॥

ઋષભ ઉવાચ
નાયં દેહો દેહભાજાં નૃલોકે
કષ્ટાન્ કામાનર્હતે વિડ્ભુજાં યે ।
તપો દિવ્યં પુત્રકા યેન સત્ત્વં
શુદ્ધ્યેદ્યસ્માદ્બ્રહ્મસૌખ્યં ત્વનન્તમ્ ॥ ૧॥

મહત્સેવાં દ્વારમાહુર્વિમુક્તે-
સ્તમોદ્વારં યોષિતાં સઙ્ગિસઙ્ગમ્ ।
મહાન્તસ્તે સમચિત્તાઃ પ્રશાન્તા
વિમન્યવઃ સુહૃદઃ સાધવો યે ॥ ૨॥

યે વા મયીશે કૃતસૌહૃદાર્થા
જનેષુ દેહમ્ભરવાર્તિકેષુ ।
ગૃહેષુ જાયાઽઽત્મજરાતિમત્સુ
ન પ્રીતિયુક્તા યાવદર્થાશ્ચ લોકે ॥ ૩॥

નૂનં પ્રમત્તઃ કુરુતે વિકર્મ
યદિન્દ્રિયપ્રીતય આપૃણોતિ ।
ન સાધુ મન્યે યત આત્મનોઽય-
મસન્નપિ ક્લેશદ આસ દેહઃ ॥ ૪॥

પરાભવસ્તાવદબોધજાતો
યાવન્ન જિજ્ઞાસત આત્મતત્ત્વમ્ ।
યાવત્ક્રિયાસ્તાવદિદં મનો વૈ
કર્માત્મકં યેન શરીરબન્ધઃ ॥ ૫॥

એવં મનઃ કર્મવશં પ્રયુઙ્ક્તે
અવિદ્યયાઽઽત્મન્યુપધીયમાને ।

કર્માશયં હૃદયગ્રન્થિબન્ધ-
મવિદ્યયાસાદિતમપ્રમત્તઃ ।
અનેન યોગેન યથોપદેશં
સમ્યગ્વ્યપોહ્યોપરમેત યોગાત્ ॥ ૧૪॥

પુત્રાંશ્ચ શિષ્યાંશ્ચ નૃપો ગુરુર્વા
મલ્લોકકામો મદનુગ્રહાર્થઃ ।
ઇત્થં વિમન્યુરનુશિષ્યાદતજ્જ્ઞાન્
ન યોજયેત્કર્મસુ કર્મમૂઢાન્ ।
કં યોજયન્ મનુજોઽર્થં લભેત
નિપાતયન્ નષ્ટદૃશં હિ ગર્તે ॥ ૧૫॥

લોકઃ સ્વયં શ્રેયસિ નષ્ટદૃષ્ટિ-
ર્યોઽર્થાન્ સમીહેત નિકામકામઃ ।
અન્યોન્યવૈરઃ સુખલેશહેતો-
રનન્તદુઃખં ચ ન વેદ મૂઢઃ ॥ ૧૬॥

કસ્તં સ્વયં તદભિજ્ઞો વિપશ્ચિ-
દવિદ્યાયામન્તરે વર્તમાનમ્ ।
દૃષ્ટ્વા પુનસ્તં સઘૃણઃ કુબુદ્ધિં
પ્રયોજયેદુત્પથગં યથાન્ધમ્ ॥ ૧૭॥

ગુરુર્ન સ સ્યાત્સ્વજનો ન સ સ્યાત્
પિતા ન સ સ્યાજ્જનની ન સા સ્યાત્ ।
દૈવં ન તત્સ્યાન્ન પતિશ્ચ સ સ્યા-
ન્ન મોચયેદ્યઃ સમુપેતમૃત્યુમ્ ॥ ૧૮॥

ઇદં શરીરં મમ દુર્વિભાવ્યં
સત્ત્વં હિ મે હૃદયં યત્ર ધર્મઃ ।
પૃષ્ઠે કૃતો મે યદધર્મ આરા-
દતો હિ મામૃષભં પ્રાહુરાર્યાઃ ॥ ૧૯॥

તસ્માદ્ભવન્તો હૃદયેન જાતાઃ
સર્વે મહીયાંસમમું સનાભમ્ ।
અક્લિષ્ટબુદ્ધ્યા ભરતં ભજધ્વં

પર્યપાલયત્ ॥ ૪॥

ઈજે ચ ભગવન્તં યજ્ઞક્રતુરૂપં ક્રતુભિરુચ્ચાવચૈઃ
શ્રદ્ધયાऽऽહૃતાગ્નિહોત્રદર્શપૂર્ણમાસચાતુર્માસ્ય-
પશુસોમાનાં પ્રકૃતિવિકૃતિભિરનુસવનં
ચાતુર્હોત્રવિધિના ॥ ૫॥

સમ્પ્રચરત્સુ નાનાયાગેષુ વિરચિતાઙ્ગક્રિયેષ્વપૂર્વં
યત્તત્ક્રિયાફલં ધર્માખ્યં પરે બ્રહ્મણિ યજ્ઞપુરુષે
સર્વદેવતાલિઙ્ગાનાં મન્ત્રાણામર્થનિયામકતયા
સાક્ષાત્કર્તરિ પરદેવતાયાં ભગવતિ વાસુદેવ એવ
ભાવયમાન આત્મનૈપુણ્યમૃદિતકષાયો
હવિઃષ્વધ્વર્યુભિર્ગૃહ્યમાણેષુ સ યજમાનો યજ્ઞભાજો
દેવાંસ્તાન્ પુરુષાવયવેષ્વભ્યધ્યાયત્ ॥ ૬॥

એવં કર્મવિશુદ્ધ્યા વિશુદ્ધસત્ત્વસ્યાન્તર્હૃદયાકાશ-
શરીરે બ્રહ્મણિ ભગવતિ વાસુદેવે મહાપુરુષરૂપો-
પલક્ષણે શ્રીવત્સકૌસ્તુભવનમાલાદરગદાદિભિ-
રુપલક્ષિતે નિજપુરુષહૃલ્લિખિતેનાત્મનિ પુરુષરૂપેણ
વિરોચમાન ઉચ્ચૈસ્તરાં ભક્તિમનુદિનમેધમાન-
રજયાજાયત ॥ ૭॥

એવં વર્ષાયુતસહસ્રપર્યન્તાવસિતકર્મનિર્વાણાવસરો-
ऽધિભુજ્યમાનં સ્વતનયેભ્યો રિક્થં પિતૃપૈતામહં
યથાદાયં વિભજ્ય સ્વયં સકલસમ્પન્નિકેતાત્પુલહાશ્રમં
પ્રવવ્રાજ ॥ ૮॥

યત્ર હ વાવ ભગવાન્ હરિરદ્યાપિ તત્રત્યાનાં નિજજનાનાં
વાત્સલ્યેન સન્નિધાપ્યત ઇચ્છારૂપેણ ॥ ૯॥

યત્રાશ્રમપદાન્યુભયતો નાભિભિર્દૃષચ્ચક્રૈશ્ચક્રનદી
નામ સરિત્પ્રવરા સર્વતઃ પવિત્રીકરોતિ ॥ ૧૦॥

તસ્મિન્ વાવ કિલ સ એકલઃ પુલહાશ્રમોપવને
વિવિધકુસુમકિસલયતુલસિકામ્બુભિઃ કન્દમૂલ-
ફલોપહારૈશ્ચ સમીહમાનો ભગવત આરાધનં વિવિક્ત
ઉપરતવિષયાભિલાષ ઉપભૃતોપશમઃ પરાં

કાલોપપન્નં ફલમાવ્યનક્તિ ।
આલિઙ્ગ્ય માયારચિતાન્તરાત્મા
સ્વદેહિનં સંસૃતિચક્રકૂટઃ ॥ ૬॥

તાવાનયં વ્યવહારઃ સદાવિઃ
ક્ષેત્રજ્ઞસાક્ષ્યો ભવતિ સ્થૂલસૂક્ષ્મઃ ।
તસ્માન્મનો લિઙ્ગમદો વદન્તિ
ગુણાગુણત્વસ્ય પરાવરસ્ય ॥ ૭॥

ગુણાનુરક્તં વ્યસનાય જન્તોઃ
ક્ષેમાય નૈર્ગુણ્યમથો મનઃ સ્યાત્ ।
યથા પ્રદીપો ઘૃતવર્તિમશ્નન્
શિખાઃ સધૂમા ભજતિ હ્યન્યદા સ્વમ્ ।
પદં તથા ગુણકર્માનુબદ્ધં
વૃત્તીર્મનઃ શ્રયતેઽન્યત્ર તત્ત્વમ્ ॥ ૮॥

એકાદશાસન્મનસો હિ વૃત્તય
આકૂતયઃ પઞ્ચ ધિયોઽભિમાનઃ ।
માત્રાણિ કર્માણિ પુરં ચ તાસાં
વદન્તિ હૈકાદશ વીર ભૂમીઃ ॥ ૯॥

ગન્ધાકૃતિસ્પર્શરસશ્રવાંસિ
વિસર્ગરત્યર્ત્યભિજલ્પશિલ્પાઃ ।
એકાદશં સ્વીકરણં મમેતિ
શય્યામહં દ્વાદશમેક આહુઃ ॥ ૧૦॥

દ્રવ્યસ્વભાવાશયકર્મકાલૈ-
રેકાદશામી મનસો વિકારાઃ ।
સહસ્રશઃ શતશઃ કોટિશશ્ચ
ક્ષેત્રજ્ઞતો ન મિથો ન સ્વતઃ સ્યુઃ ॥ ૧૧॥

ક્ષેત્રજ્ઞ એતા મનસો વિભૂતી-
ર્જીવસ્ય માયારચિતસ્ય નિત્યાઃ ।
આવિર્હિતાઃ ક્વાપિ તિરોહિતાશ્ચ
શુદ્ધો વિચષ્ટે હ્યવિશુદ્ધકર્તુઃ ॥ ૧૨॥

ક્ષેત્રજ્ઞ આત્મા પુરુષઃ પુરાણઃ

મનીષયા કલ્પિતવિષયો નાઞ્જસાવ્યુત્પન્નલોક-
સમધિગમઃ અથ તદેવૈતદ્દુરવગમં સમવેતા-
નુકલ્પેન નિર્દિશ્યતામિતિ ॥ ૨૬॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
પઞ્ચમસ્કન્ધે ત્રયોદશોઽધ્યાયઃ ॥ ૧૩॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ ચતુર્દશોઽધ્યાયઃ ॥

સ હોવાચ
ય એષ દેહાત્મમાનિનાં સત્ત્વાદિગુણવિશેષવિકલ્પિત-
કુશલાકુશલસમવહારવિનિર્મિતવિવિધદેહાવલિભિ-
ર્વિયોગસંયોગાદિ અનાદિસંસારાનુભવસ્ય દ્વારભૂતેન
ષડિન્દ્રિયવર્ગેણ તસ્મિન્ દુર્ગાધ્વવદસુગમેઽધ્વ-
ન્યાપતિત ઈશ્વરસ્ય ભગવતો વિષ્ણોર્વશવર્તિન્યા
માયયા જીવલોકોઽયં યથા વણિક્સાર્થોઽર્થપરઃ
સ્વદેહનિષ્પાદિતકર્માનુભવઃ શ્મશાનવદશિવતમાયાં
સંસારાટવ્યાં ગતો નાદ્યાપિ વિફલબહુપ્રતિયોગેહસ્ત-
ત્તાપોપશમનીં હરિગુરુચરણારવિન્દમધુકરાનુપદવી-
મવરુન્ધે ॥ ૧॥

યસ્યામુ હ વા એતે ષડિન્દ્રિયનામાનઃ કર્મણા દસ્યવ
એવ તે તદ્યથા પુરુષસ્ય ધનં યત્કિઞ્ચિદ્ધર્મૌપયિકં બહુ
કૃચ્છ્રાધિગતં સાક્ષાત્પરમપુરુષારાધનલક્ષણો યોઽસૌ
ધર્મસ્તં તુ સામ્પરાય ઉદાહરન્તિ । તદ્ધર્મ્યં ધનં દર્શન-
સ્પર્શનશ્રવણાસ્વાદનાવઘ્રાણસઙ્કલ્પવ્યવસાયગૃહ-
ગ્રામ્યોપભોગેન કુનાથસ્યાજિતાત્મનો યથા સાર્થસ્ય
વિલુમ્પન્તિ ॥ ૨॥

અથ ચ યત્ર કૌટુમ્બિકા દારાપત્યાદયો નામ્ના કર્મણા

પરિમાણલક્ષણો નામ વિંશોઽધ્યાયઃ ॥ ૨૦॥

## ॥ ૐ નમો ભગવતે વાસુદેવાય ॥

## ॥ એકવિંશોઽધ્યાયઃ ॥

શ્રીશુક ઉવાચ
એતાવાનેવ ભૂવલયસ્ય સન્નિવેશઃ પ્રમાણલક્ષણતો
વ્યાખ્યાતઃ ॥ ૧॥

એતેન હિ દિવો મણ્ડલમાનં તદ્વિદ ઉપદિશન્તિ
યથા દ્વિદલયોર્નિષ્પાવાદીનાં તે અન્તરેણાન્તરિક્ષં
તદુભયસન્ધિતમ્ ॥ ૨॥

યન્મધ્યગતો ભગવાંસ્તપતાં પતિસ્તપન આતપેન
ત્રિલોકીં પ્રતપત્યવભાસયત્યાત્મભાસા સ એષ
ઉદગયનદક્ષિણાયનવૈષુવતસંજ્ઞાભિર્માન્દ્યશૈઘ્ર્ય-
માનાભિર્ગતિભિરારોહણાવરોહણસમાનસ્થાનેષુ
યથા સવનમભિપદ્યમાનો મકરાદિષુ રાશિષ્વ-
હોરાત્રાણિ દીર્ઘહ્રસ્વસમાનાનિ વિધત્તે ॥ ૩॥

યદા મેષતુલયોર્વર્તતે તદાહોરાત્રાણિ
સમાનાનિ ભવન્તિ યદા વૃષભાદિષુ પઞ્ચસુ
ચ રાશિષુ ચરતિ તદાહાન્યેવ વર્ધન્તે હ્રસતિ
ચ માસિ માસ્યેકૈકા ઘટિકા રાત્રિષુ ॥ ૪॥

યદા વૃશ્ચિકાદિષુ પઞ્ચસુ વર્તતે તદાહોરાત્રાણિ
વિપર્યયાણિ ભવન્તિ ॥ ૫॥

યાવદ્દક્ષિણાયનમહાનિ વર્ધન્તે યાવદુદગયનં
રાત્રયઃ ॥ ૬॥

એવં નવકોટય એકપઞ્ચાશલ્લક્ષાણિ યોજનાનાં
માનસોત્તરગિરિપરિવર્તનસ્યોપદિશન્તિ
તસ્મિન્નૈન્દ્રીં પુરીં પૂર્વસ્માન્મેરોર્દેવધાનીં નામ

